द्वादशोऽध्यायः ।

दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥ १ ॥

[दृशानः । रुक्मः । उर्व्या । वि । अद्यौत् । दुर्मर्षमिति दुःऽमर्षम् । आयुः । श्रिये । रुचानः ॥ अग्निः । अमृतः । अभवत् । वयोभिरिति वयःऽभिः । यत् । एनम् । द्यौः । अजनयत् । सुरेताऽइतिसुऽरेताः ॥१॥]

(इस बारहवें अध्याय में उखा को ऊपर धारण किये जाने के मंत्रों का संग्रह है। यजमान एक सोने के **'रुक्म'**-संज्ञक हार को गले में पहनता है। इस हार में सोने के २१ छोटे-छोटे तावीज गुथे रहते हैं। तावीज कृष्णाजिन के एक टुकड़े में ढँके रहते हैं। वे सन की एक तिलड़ी रस्सी (=सुतली) में पिरोए रहते हैं। यह तावीज कृष्णाजिन के काले सफेद रोओं के स्थापन्न समझे जाते हैं। इस यजमान का मुख ईशान दिशा की ओर होता है। वास्तविक **रुक्म** सूर्य है। यहाँ सूर्य की स्तुति ही की गई है।) अपनी महती ज्योति से प्रकाशित यह दृश्यमान सूर्य पूर्व दिशा में उदय को प्राप्त हुआ। इसका दिवसभर का जीवन तो सर्वथा दुर्धर्ष है। यह शोभा प्राप्त करने के लिए दीप्ति को धारण कर रहा है। सुवीर्या द्यौ ने जब इस सूर्य को प्रकट किया, तब हविरान्नों के द्वारा अग्नि अमृत (=देवत्व) बन गया (=हविरान्नों से अग्नि को तृप्त किया=होम प्रारम्भ किये गये) ॥ १ ॥

उ० यजमानः कण्ठे रुक्मं प्रतिमुञ्चति । दृशानो रुक्मः त्रिष्टुप् । आदित्याध्यासेन रुक्मस्तुतिः । यो दृशानः दृश्यमानः प्रत्यक्षत उपलभ्यमानः । रुक्मः रोचनः । उर्व्या महत्या दीप्त्या व्यद्योत् विद्योतते यस्य च दुर्मर्षमायुः दुर्मर्षमनवखण्डितम् आयुर्जीवनम् । श्रिये रुचानः यश्च जनेभ्यः श्रियं दातुं रोचते सोऽयमग्निः अमृतः अमरणधर्मा चाभवत् । वयोभिरन्नैः पशुपुरोडाशप्रभृतिभिः यदेनं द्यौरजनयत् । यच्च एनमग्निं द्यौः अजनयत् जनितवती । सुरेताः शोभनरेताः । रेतः पुत्रः । 'सुरेता ह्येषा यस्यायमग्निः' इति द्वितीयममृतत्वकारणमग्नेः ॥ १ ॥

म० एकादशाध्याये उखासंभरणादिमन्त्रा उक्ताः द्वादशेऽध्याये उखाधारणादिमन्त्रा उच्यन्ते । तत्र 'यजमानः कण्ठे रुक्मं प्रतिमुञ्चते परिमण्डलमेकविꣳशतिपिण्डं कृष्णाजिननिष्यूतं लोमसु शुक्लकृष्णेषु शणसूत्रे त्रिवृत्प्रोतमुपरिनाभि बहिष्पिण्डं दृशानो रुक्म इति' (१६ । ५ । १) । समिदाधानान्ते ऐशान्यां तिष्ठन्यजमानो ग्रीवायां रुक्मं स्वर्णनिर्मितं फलकाकारमाभरणविशेषं बध्नाति । कीदृशम् । वर्तुलम् एकविंशतिः पिण्डा यत्र । शणकदलतुल्याः स्वरूपाद्बहिर्भूता उन्नतबिन्दवः

पिण्डा उच्यन्ते । कृष्णाजिनखण्डे श्वेतकृष्णरोमस्थाने स्यूतम् त्रिगुणशणसूत्रे प्रोतं नाभेरूर्ध्वं वर्तमानं पिण्डा बहिर्भवन्ति तथा धार्यमिति सूत्रार्थः । रुक्मदेवत्या त्रिष्टुप् वत्सप्रीदृष्टा । आदित्याध्यासेन रुक्मः स्तूयते । रुक्म आभरणविशेषः उर्व्या महत्या दीप्त्या व्यद्यौत् विद्योतते । 'द्युत द्योतने' व्यत्ययेन शपि लुप्ते वृद्धौ लङि रूपम् । कीदृशो रुक्मः । दृशानो दृश्यमानः । शानचि शपो लुक् । प्रत्यक्षमुपलभ्यमानः । श्रिये जनेभ्यः श्रियं दातुम् । दुर्मर्षं दुर्मर्षमनवखण्डितं केनाप्यतिरस्कार्यं वा आयुः जीवनं रुचानः रोचत इति रुचानो वाञ्छन् । रोचतेः शानचि 'बहुलं छन्दसि' (पा० २ । ४ । ७३) इति शपो लुक् सोऽयमग्निर्वयोभिरन्नैः पशुपुरोडाशप्रभृतिभिरमृतोऽमरणधर्मा अभवत् । यद्यस्मात्कारणात् द्यौर्द्युलोकवासी देवगण एनमग्निमजनयत् जनितवती । कीदृशी द्यौः । सुरेताः शोभनं रेतोऽग्निरूपं यस्याः सा तस्मादमृतत्वं युक्तम् ॥ १ ॥

नक्तो॒षासा॒ सम॑नसा॒ विरू॑पे धा॒पये॑ते॒ शिशु॒मेक॑ᳪ᳭ स॒मीची॑ । द्यावा॒क्षामा॑ रु॒क्मो अ॒न्तर्वि भा॑ति दे॒वा अ॒ग्निं धा॑रयन्द्रवि॒णोदाः ॥ २ ॥

[नक्तो॒षासा॑ । नक्तो॒षसेति॒नक्त॒ऽउ॒षसा॑ । सम॑न॒सेति॒स॒ऽम॑नसा । वि॒रू॑पे॒ऽइति॒वि रू॑पे । धा॒पये॑ते॒ऽइति॒धा॒पये॑ते । शिशु॑म् । एक॑म् । स॒मीची॒ऽइति॒सम् ई॒ची ॥ द्यावा॒क्षामा॑ । रु॒क्मः॒ । अ॒न्त॒रि॒ति॑ । वि । भा॒ति॒ । दे॒वाः॒ । अ॒ग्निम् । धा॒र॒यन् । द्र॒वि॒णो॒दा॒ऽइति॑द्रविणः॒ऽदाः॒ ॥२॥]

समान चित्त तथा समान प्रेमभाव से अपनी-अपनी कालयात्रा करने वाले, परन्तु स्वरूप से श्वेत-कृष्ण होकर परस्पर विपरीत वर्ण वाले यह दिन-रात्रि इस एक अग्निशिशु को स्तन्यपान (=हविरादि लाभ) कराते हैं (=प्रातः-सायं होम किये जाते हैं)। जैसे ही और जब तक (=सायंकाल) यह प्रकाशमान रुक्म (=सूर्य) द्यावापृथिवी के मध्य चमकता है, वैसे ही धन (=प्राण) देने वाले देवगण इस अग्नि (=अग्निहोत्र) को धारण करते हैं। (इस मंत्र के प्रथमार्ध से यजमान आहवनीय वेदिस्थ उखा को दो गोल ईंटों से ऊपर उठाता है। उसे एक लोहे के सिकहर में धरता है। उस सिकहर को उखा-सहित ऊपर उठाये रहने के लिए उसमें ६ रस्सियाँ बँधी रहती हैं। यजमान उस सिकहर की रस्सियों को अपने गले में पहन लेता है (—मानो सकिरण सूर्य बन गया हो)। वह उस उखा-सिकहर को रस्सियों के सहारे ऊपर उठाकर पूर्व की ओर चलता है। आहवनीय वेदि से पूर्व की ओर बाधों से बुनी हुई एक मचिया (=आसन्दी) धरी रहती है। यजमान उस उखा-सिकहर को उसी मचिया पर धर देता है। मचिया चौकोर और गूलर के लकड़ी की बनी होती है) ॥ २ ॥

उ० द्वाभ्यां परिगृह्णाति । नक्तोषासा । आग्नेयी त्रिष्टुप् नक्ता रात्रिः उषाशब्देनाहरुच्यते राज्यहनी । समनसा एकमनस्के । विरूपे नानारूपे । कृष्णा रात्रिः शुक्लमहः । धापयेते पाययेते सायंप्रातरग्निहोत्रादिभिः कर्मभिः। शिशुं बालमिव मातापितरौ एकं अग्निलक्षणम्। समीची सम्यगञ्चिते संश्लिष्टे वा । ये इत्थंभूते ताभ्यां गृह्णामीति शेषः । हरन् जपति द्यावाक्षामा । द्यावापृथिव्यौ यो रुक्मः रोचनः अन्तर्विभाति अन्तरादीप्यते तं हरामीति शेषः । निदधाति । देवा अग्निं धारयन्द्रविणोदाः यमग्निं देवा द्रविणोदाः धनदातारो धारितवन्तः तमहं धारयामीति शेषः ॥ २ ॥

म० 'परिमण्डलाभ्यामिण्ड्वाभ्यामुखां परिगृह्णाति नक्तोषासेति' (का० १६ । ५ । ३) । वर्तुलाभ्यामुखाधारणसाधनरूपाभ्यामिण्ड्वाभ्यामुखां गृह्णातीति सूत्रार्थः । अग्निदेवत्या त्रिष्टुप् कुत्सदृष्टा । अर्धमुखाग्रहणे विनियुक्तम् । नक्तोषासा नक्तं च उषाश्च नक्तोषसौ । विभक्तेराकारः संहितायां दीर्घः । नक्तं रात्रिः उषा अहः । नक्तोषसौ रात्रिदिवसौ एकमग्निं धापयेते पाययेते सायंप्रातरग्निहोत्रादिकर्मभिः तर्पयेते इत्यर्थः । तत्र लुप्तोपमानम् । शिशुं बालं मातापितराविव । 'धेट् पाने' 'हेतुमति च' (पा० ३ । १ । २६) इति णिच् 'आदेच उपदेशेऽशिति' (पा० ६ । १ । ४५) इति आकारे 'अर्तिह्री' (पा० ७ । ३ । ३६) इत्यादिना पुक् । कीदृश्यौ नक्तोषसौ । समनसा समनसौ समानं मनो ययोस्ते एकमनस्के परमैकमत्ययुक्ते इत्यर्थः । विरूपे विलक्षणं रूपं ययोस्ते विरूपे । कृष्णा रात्रिः शुक्लमहः । समीची सम्यगञ्चतस्ते समीच्यः सम्यगञ्चने समन्विते संश्लिष्टे वा । पूर्वसवर्णो विभक्तेः । ये इत्थंभूते रात्र्यहनी ताभ्यामिण्ड्वारूपाभ्यामुखां गृह्णामीति शेषः । 'हरति द्यावाक्षामेति' (का० १६ । ५ । ४) । आहवनीयोपरिस्थामुखामेवमिण्ड्वाभ्यामादाय द्यावेति पादेनासन्दीं प्रति तां हरतीति सूत्रार्थः । द्यावाक्षामा द्यौश्च क्षामा पृथिवी च द्यावाक्षामा । दिवो द्यावादेशः विभक्तेर्लोपः । द्यावापृथिव्योरन्तर्मध्ये अन्तरिक्षे च यो रुक्मः रोचमानोऽग्निर्विभाति प्रकाशते तं हरामीति शेषः । 'आहवनीयस्य पुरस्तादुद्गात्रासन्दीवदासन्द्यां चतुरस्राङ्क्यां शिक्यवत्यामादधाति देवा अग्निमिति' (का० १६ । ५ । ५) । आहवनीयात्पूर्वदिशि भूमौ स्थापितायामासन्द्यामुखां निदधाति देवा इति पादेन । उद्गात्रासन्दीवदिति प्रादेशमात्रपाद्यामौदुम्बर्यामरत्निमात्राङ्क्यां मुञ्जरज्ज्वा व्युतायामिति लभ्यते । तथा चतुरस्राङ्क्यां चतुरस्राणि चतुष्कोणानि अङ्कानीषोपलपादरूपाणि यस्यास्तस्यां सशिक्यायां चेति सूत्रार्थः । देवाः दीव्यन्ति व्यवहरन्तीति देवाः प्राणा यजमानस्य एतमग्निं धारयन् अधारयन् । अडभाव आर्षः । कीदृशा देवाः । द्रविणोदाः यागद्वारेण द्रविणं धनरूपं फलं ददति प्रयच्छन्ति ते । तमहं धारयामीति शेषः । 'अग्निं धारयन् द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदाः' इति तैत्तिरीयश्रुतेर्देवशब्देन प्राणा उच्यन्ते ॥ २ ॥

विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । विनाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो विराजति ॥ ३ ॥

[विश्वा । रूपाणि । प्रति । मुञ्चते । कविः । प्र । असावीत् । भद्रम् । द्विपद इति द्वि पदे । चतुष्पदे । चतुःपद इति चतुः पदे ॥ वि । नाकम् । अख्यत् । सविता । वरेण्यः । अनु । प्रयाणम् । प्रयानमिति प्र यानम् । उषसः । वि । राजति ॥३॥]

क्रान्तद्रष्टा यह सूर्य स्वकिरणों के विविध रूपों को व्यक्त करता है या अन्धकाराच्छन्न पदार्थों के विविध कार्यों को प्रकाशित करता है। इसने द्विपाद मनुष्यादि और चतुष्पाद गवादि के लिए कल्याण (=स्वस्वव्यापारनिरतता) को उत्पन्न करता है। यह वरणीय सर्वप्रेरक सूर्य स्वर्ग को प्रकाशित करता है। यह उषा के जाने के पश्चात् आकाश में शोभायमान होता है। (इस मंत्र से यजमान रज्जुओं को अपने गले में बाँधता है) ॥३॥

उ० शिक्यपाशं प्रतिमुञ्चति । विश्वा रूपाणि जगती सावित्री । यः विश्वानि सर्वाणि रूपाणि प्रतिमुञ्चते प्रतिबध्नाति । द्रव्येष्वपहत्य शार्वरं तमः प्रकाशयतीत्यर्थः । कविः क्रान्तदर्शनः । यश्च प्रासावीत्प्रसौति । भद्रं भन्दनीयम् । द्विपदे चतुष्पदे द्विपाच्चश्चतुष्पाच्चश्च । विनाकमख्यत्सविता वरेण्यः । यश्च व्यख्यत् विख्यापयति प्रकाशयति । नाकं द्युलोकम् । सविता सर्वस्य प्रसविता । वरेण्यः वरणीयः । अनु प्रयाणमुषसो विराजति । स सविता उषसः प्रयाणं प्रगमनम् अनु पश्चात् विराजति दीप्यते । 'उषाः सवितुः पुरोगामिनी' इति सवितुः स्तुतिः । य इत्थंभूतः सविता स शिक्यं प्रतिमुञ्चत्विलर्थः ॥ ३ ॥

म० 'शिक्यपाशं प्रतिमुञ्चते षडुद्यामं विश्वा रूपाणीति' (का० १६ । ५ । ६) । उत् ऊर्ध्वं यम्यते नियम्यते यैस्ते उद्यामा रज्जवः षडुद्यामा रज्जव ऊर्ध्वाकर्षणहेतवो यस्येदृशमासन्दीस्थं शिक्यपाशं यजमानः कण्ठे बध्नातीति सूत्रार्थः । सवितृदेवत्या जगती श्यावाश्वदृष्टा । कविः विद्वान् क्रान्तदर्शनः । वरेण्यः श्रेष्ठः सविता सर्वस्य प्रसविता सूर्यः विश्वा विश्वानि सर्वाणि रूपाणि प्रतिमुञ्चते द्रव्येषु प्रतिबध्नाति रात्रितमोऽपहत्य रूपाणि प्रकाशयतीत्यर्थः । यश्च द्विपदे चतुष्पदे द्विपाद्भ्यश्चतुष्पाद्भ्यो मनुष्यपश्वादिभ्यो भद्रं कल्याणं स्वस्वव्यवहारप्रकाशनरूपं श्रेयः प्रासावीत् प्रसौति प्रेरयति । यश्च नाकं स्वर्गं व्यख्यत् विख्याति प्रकाशयति । 'अस्यतिवक्तिख्यातिभ्योऽङ्' (पा० ३ । १ । ५२) इति च्लेरङ् । यश्च उषसः उषःकालस्य प्रयाणं गमनमनु पश्चात् उषःकाले व्यतीते सति विराजति विशेषेण दीप्यते । 'उषाः सवितुः पुरोगामिनी' इति सवितुः स्तुतिः । ईदृशः सविता शिक्यं प्रतिमुञ्चत्विति शेषः ॥ ३ ॥

सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोम आत्मा छन्दाᳬंस्यङ्गानि यजूᳬंषि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः । सुपर्णोसि गरुत्मान्दिवं गच्छ स्वः पत ॥ ४ ॥

[सुपर्ण इति सु पर्णः । असि । गरुत्मान् । त्रिवृदिति त्रि वृत् । ते । शिरः । गायत्रम् । चक्षुः । बृहद्रथन्तरे इति बृहत् रथन्तरे । पक्षौ ॥ स्तोमः । आत्मा । छन्दाᳬंसि । अङ्गानि । यजूᳬंषि । नाम ॥ साम । ते । तनूः । वामदेव्यमिति वाम देव्यम् । यज्ञायज्ञियमिति यज्ञा यज्ञियम् । पुच्छम् । धिष्ण्याः । शफाः ॥ दिवम् । गच्छ । स्वरिति स्वः । पत ॥४॥]

हे सवितादेव ! तुम गरुड-स्वरूप हो। त्रिवृत् साम तुम्हारा शिर है; गायत्रसाम तुम्हारी आँखें हैं; बृहत्साम और रथन्तर साम तुम्हारे दो पखने हैं; पञ्चदशस्तोम तुम्हारा अन्तःकरणस्थानीय है; सात छन्द तुम्हारे अंग हैं; सब यजुष् तुम्हारे नाम हैं, वामदेव्यसाम तुम्हारा शरीर है; यज्ञायज्ञियसाम तुम्हारी पूँछ है तथा होत्रादि धिष्ण्याओं में स्थित अग्नियाँ तुम्हारे पंजे हैं। हे सवितृदेव ! तुम शुभगति गरुडपक्षी हो। तुम द्युलोक में गमन करो और स्वर्ग में उड़ो। (इस मंत्र से यजमान उखा-सिकहर में स्थित अग्नि को ऊपर उठाये रहता है) ॥ ४ ॥

उ० विकृत्याऽभिमन्त्रयते । विकृतिश्चतुरवसाना गारुत्मती विषघ्नी । सुपर्णोऽसि सुपतनस्त्वमसि । गरुत्मान् गणवान् अशनवान् । त्रिवृत्स्तोमः ते तव शिरः । गायत्रं चक्षुः । बृहद्रथन्तरे सामनी पक्षौ । पञ्चविंशः स्तोमः आत्मा । छन्दांस्येकविंशतिरङ्गानि यजूंषि नाम । साम ते तनूः । वामदेव्यं यज्ञायज्ञियं पुच्छम् । धिष्ण्याः अग्नयः शफाः खुराः । यतश्च त्वं सुपर्णोऽसि गरुत्मान् अतो ब्रवीमि त्वाम् । दिवं गच्छ स्वः स्वर्लोकं पत ॥ ४ ॥

म० 'सशिक्यं प्राञ्चं प्रगृह्णाति सुपर्णोऽसीति पिण्डवत्' (का० १६ । ५ । ७) । शिक्यसहितमुख्याग्निं प्राच्यामूर्ध्वं धारयति पिण्डवदित्यूर्ध्वबाहुः । अनेनोख्याग्नेरभिमन्त्रणमप्युक्तं कैश्चिदिति सूत्रार्थः । गरुत्मद्देवत्या विषहन्त्री चतुरवसाना कृतिः । हे अग्ने, त्वं सुपर्णः शोभनं पर्णं पतनं यस्य स पक्षिरूपोऽसि पक्ष्याकारेण चितत्वात् । तत्र दृष्टान्तः । गरुत्मान् गरुडो यथा पक्षिराजस्तद्वत् । तस्यावयवाः कथ्यन्ते । त्रिवृत्

ते तव शिरः त्रिवृत्स्तोमस्तव शिरःस्थानीयः । गायत्रं चक्षुः यद्गायत्राख्यं साम तत्तव चक्षुः नेत्रस्थानीयम् । बृहद्रथन्तरे पक्षौ बृहद्रथन्तराख्ये सामनी तव पक्षस्थानीये । स्तोम आत्मा पञ्चदशस्तोमस्तवात्मा अन्तःकरणस्थानीयः । छन्दांसि अङ्गानि गायत्र्यादीनि एकविंशतिच्छन्दांसि तव हृदयाद्यङ्गस्थानीयानि । यजूंषि नाम इषे त्वेत्यादीनि यजूंषि तव नामस्थानीयानि । वामदेव्यं साम ते तव तनूः शरीरस्थानीयम् । यज्ञायज्ञियाख्यं साम तव पुच्छं पुच्छस्थानीयम् । धिष्ण्याः शफाः होत्रादिधिष्ण्यस्थिता अग्नयस्तव शफाः खुरस्थानीयाः । हे अग्ने, एवंभूतस्त्वं यतो गरुत्मान् गरुड इव सुपर्णः पक्षिरूपोऽसि अतो दिवमाकाशं प्रति गच्छ । तत्रापि स्वः पत स्वः स्वर्गलोकं प्राप्नुहि ॥ ४ ॥

विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आ रोह पृथिवीमनु विक्रमस्व विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्द आरोहान्तरिक्षमनु विक्रमस्व विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह दिवमनु विक्रमस्व विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छन्द आरोह दिशोऽनु विक्रमस्व ॥ ५ ॥

[विष्णोः । क्रमः । असि । सपत्नहेति सपत्न हा । गायत्रम् । छन्दः । आ । रोह । पृथिवीम् । अनु । वि । क्रमस्व । अभिमातिहेत्यभिमाति हा । त्रैष्टुभम् । त्रैस्तुभमिति त्रैस्तुभम् । अन्तरिक्षम् । अरातीयतः । अरातियत इत्यराति यतः । हन्ता । जागतम् । दिवम् । शत्रूयतः । शत्रुयत इति शत्रु यतः । हन्ता । आनुष्टुभम् । आनुस्तुभमित्यानु स्तुभम् । दिशः ॥५॥]

(इस पाँचवें मंत्र के चार यजुषों से यजमान **'विष्णुपदों'** को धरता है—चार कदम पूर्व में चलता है । उखा में स्थित यह अल्पमात्रिक अग्नि ही विष्णु है । इसे धारण किये हुए यजमान भी स्वयं को इस अग्नि के साहचर्य से विष्णु (यज्ञ का अभिमानी देव) मानता है । प्रथम पादन्यास करते समय वह उस प्रथम पादन्यास को पृथ्वीलोक, द्वितीय को अन्तरिक्ष, तृतीय को द्युलोक और चौथे पादन्यास को वह विस्तृता चारों दिशाएँ करके समझता है) । हे मेरे प्रथम पादन्यास ! तुम अग्निरूपी विष्णु (=यज्ञदेव) के पादन्यास हो । तुम शत्रुओं के नाश करने वाले हो । तुम गायत्री छन्द पर आरूढ़ होओ और इस पृथ्वी को विकसित कर लो (=जीत लो) । हे मेरे द्वितीय पादन्यास ! तुम विष्णु का प्रक्रम हो । तुम अभिमानी शत्रु का हनन करने वाले हो । तुम त्रिष्टुभ् छन्द पर आरूढ़ होओ । तुम अन्तरिक्ष को विक्रमित कर लो । हे तृतीय पादन्यास ! तुम विष्णु का प्रक्रम हो । तुम अदातृत्व आचरण करने वाले को मारने वाले हो । तुम जगती छन्द पर आरूढ़ होओ और द्युलोक को अनुक्रान्त कर लो । हे चतुर्थ पादन्यास ! तुम विष्णु के चौथे पादन्यास हो । तुम शत्रुत्व का आचरण करने वाले को मारने वाले हो । तुम अनुष्टुप् छन्द पर आरूढ़ होओ और इन चारों दिशा-विदिशाओं को स्व-पराक्रम से अनुक्रमित (=विजित) कर लो ॥ ५ ॥

उ० विष्णुक्रमान्क्रमते । विष्णोः क्रमोऽसि । विष्णोः यज्ञस्याग्नेः यतः क्रमोऽसि सपत्नहा च शत्रुघातकश्च अतः गायत्रं छन्द आरोह पृथिवीमनु विक्रमस्व । अभिमातिहा अभिमातिरपि केनचिद्गुणविशेषेण शत्रुरेवोच्यते । ऋज्वन्यत् । अरातीयतो हन्ता अरातिरिवाचरति अरातीयति अरातिः शत्रुः तस्य अरातीयतः शत्रूयतो हन्ता । अधस्तनेन व्याख्यातम् ५

म० 'विष्णुक्रमान्क्रमते विष्णोरिति प्रतिमन्त्रमभ्युद्ग्रहणं च तस्मिंस्तस्मिन्' (का० १६ । ५ । ११) । विष्णुक्रमसंज्ञान्पादन्यासान्करोति तस्मिंस्तस्मिन्क्रमणे उख्यस्याग्नेरूर्ध्वं ग्रहणं कार्यमिति सूत्रार्थः । चत्वारि यजूंष्युख्याग्निदेवत्यानि ऋग्बृहतीच्छन्दस्कानि त्रीणि । चतुर्थं प्राजापत्या बृहती । विष्णुशब्देनाग्निरुच्यते । 'स यः स विष्णुर्यज्ञः स यः स यज्ञोऽयमेव स योऽयमग्निरुखायाम्' (६ । ७ । २ । ११) इति श्रुतेः । हे प्रथमपादविन्यास, त्वं विष्णोः यज्ञस्याग्नेः क्रमोऽसि । सपत्नहा सपत्नाञ्शत्रून्हन्तीति शत्रुघातकश्च । अतो गायत्रं छन्दः आरोह अनुग्राहकत्वेन स्वीकुरु । ततः पृथिवीमनु विक्रमस्व भूदेवतारूपमिमं प्रदेशं विशेषेण प्राप्नुहि । एवमुत्तरेष्वपि मन्त्रेषु योज्यम् । हे द्वितीय पादन्यास, त्वं विष्णोः क्रमोऽसि अभिमातिहा अभिमातिर्घातकः पाप्मा वा तं हन्तीति । त्रैष्टुभं छन्दः । स्वीकुरु अन्तरिक्षप्रदेशं व्याप्नुहि । हे तृतीय पादन्यास, विष्णोः क्रमोऽसि अरातीयतो हन्ता रातिर्दानं न रातिररातिर्दानाभावस्तमात्मन इच्छतीत्यरातीयन् तस्य हन्ता विनाशकः । जागतं छन्दः । आरोह दिवं द्युलोकमनु विक्रमस्व द्युलोकं व्याप्नुहि । हे चतुर्थ पादन्यास, त्वं विष्णोः क्रमोऽसि शत्रूयतो हन्ता शत्रुत्वं हन्तृत्वमिच्छति शत्रूयति शत्रूयतीति शत्रूयन् । क्यजन्ताच्छतृप्रत्यय उभयत्र । तस्य हन्ता आनुष्टुभं छन्द आरोह । अत्र चतुर्ष्वपि पादन्यासेषु यजमान आत्मानं विष्णुत्वेन भावयेत् चतुर्णां प्रक्रमाणां प्रदेशान्पृथिव्यादिलोकरूपत्वेन भावयेत् । 'दिशो वीक्षते दिशोऽनु विक्रमस्वेति' (का० १६ । ५ । १३) । सर्वा दिशः पश्यतीत्यर्थः । यजुरुष्णिक् । हे अग्ने, त्वं दिशोऽनु विक्रमस्व प्राच्यादिदिशो व्याप्नुहि ॥ ५ ॥

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ ६ ॥

[अक्रन्दत् । अग्निः । स्तनयन्निवेतिस्तनयन् इव । द्यौः । क्षाम । रेरिहत् । वीरुधः । समञ्जन्निति सम् अञ्जन् ॥ सद्यः । जज्ञानः । वि । हि । ईम् । इद्धः । अख्यत् । आ । रोदसीऽइतिरोदसी । भानुना । भाति । अन्तरित्यन्तः ॥६॥]

(अपनी भुजाओं को ऊँची किये हुए यजमान सर्वप्रथम पूर्व की ओर उखाग्नि को ऊपर उठावे)। मेघ के समान गरजते हुए अग्नि निनाद कर रहा है। मेघ की भाँति ही वह भी पृथ्वी को सर्वथा चाट रहा है तथा लताओं आदि को व्याप्त कर रहा है। अरणिमन्थन से तत्काल उत्पन्न होकर वह अत्यन्त प्रदीप्त होता है। वह अपने प्रकाश से सब वस्तुओं मात्र को प्रकाशित कर रहा है और द्यावा-पृथिवी के अन्दर, मेघस्थ विद्युत् की भाँति, स्वप्रकाश से चमक रहा है ॥ ६ ॥

उ० ऊर्ध्वबाहुः प्रदक्षिणं गृह्णात्यग्निम् । अक्रन्ददग्निः त्रिष्टुप् । अस्यामृच्यग्निपर्जन्यौ कथ्येते । अक्रन्दत् क्रन्दते विस्फूर्जति अग्निः । स्तनयन्निव द्यौः । द्यौःशब्देनात्र पर्जन्य उक्तः । यथा स्तनयन्पर्जन्यः शब्दं करोति एवमग्निः पर्जन्यवत् शब्दं करोति।अथान्यान्यपि पार्जन्यानि रूपाण्यग्नेः प्रदर्श्यन्ते। क्षामा रेरिहद्वीरुधः समञ्जन् । क्षामाशब्देन पृथिव्युच्यते । द्वितीयार्थे च प्रथमा । 'लिह आस्वादने' यथा पर्जन्य उदकभावमुपगच्छन्नत्यर्थं पृथिवीं लेढि आस्वादयति वीरुधः समञ्जन् व्याप्नुवन् एवमयमग्निः पृथिवीमत्यर्थमास्वादयति स्वकीयज्वालासमूहेनौषधीः समञ्जन्व्याप्नुवन् । अन्यदप्युच्यते । सद्यो जज्ञानो वि हीमिद्धो अख्यत् । यथा पर्जन्यः सद्य एवाभ्ररूपेण जायमानो व्यख्यत् । विरुपसर्गः ख्यातिना संबध्यते । तेन विख्यापयति हि ईं इद्धो धाराशतसहस्रैः । हि ईं इमौ निपातौ पादपूरणौ । एवमयमग्निः सद्य एव जायमानः इद्धः सन् इदं सर्वं विख्यापयति । अन्यच्च । आरोदसी भानुना भात्यन्तः । यथा पर्जन्य आभाति भानुना विद्युद्रूपेण । रोदसी द्यावापृथिव्योरन्तर्व्यवस्थितः । एवमयमग्निराभाति भानुना दीप्त्या द्यावापृथिव्योरन्तर्व्यवस्थितः । एवमग्निः पर्जन्यवत्स्तूयते ऋषिणा ॥ ६ ॥

म० 'पिण्डवत् प्रागुदञ्चं प्रगृह्णात्यक्रन्ददग्निरिति' (का० १६ । ५ । १४) । ऊर्ध्वबाहुः प्रागूर्ध्वमग्निं गृह्णातीति सूत्रार्थः । अग्निदेवत्या त्रिष्टुप् वत्सप्रीदृष्टा । अग्निरक्रन्दत् 'छन्दसि लुङ्लङ्लिटः' (पा० ३ । ४ । ६) क्रन्दति विस्फूर्जति । कीदृशः । द्यौरिव स्तनयन् । द्यौशब्देनात्र पर्जन्य उक्तः । द्यौर्मेघ इव स्तनयन् गर्जन् शब्दं कुर्वाणः 'स्तन गदी देवशब्दे' चुरादिरदन्तः । मेघसाधर्म्यमाह । क्षामा रेरिहत् 'सुपां सुलुक्' (पा० ७ । १ । ३९) इति विभक्तिलोपः । क्षामेति पृथिवीनामसु पठितम् । क्षामां पृथिवीं रेरिहत् 'लिह आस्वादने' यङ्लुगन्ताच्छतृप्रत्ययः रेफश्छान्दसः । अत्यन्तं लेढीति लेलिहत् 'नाभ्यस्ताच्छतुः' (पा० ७ । १ । ७८) इति नुमभावः । भूमिमति आस्वादयन्व्याप्नुवन् यथा मेघो जलभावं गच्छन्नत्यर्थं भूमिं लेढि । वीरुधः समञ्जन् स्वकीयज्वालासमूहेन ओषधीर्व्याप्नुवन् । अन्यदप्युच्यते । हि यस्मात् जज्ञानः उत्पद्यमानः सन् सद्यः तदानीमेव इद्धः दीप्तश्च सन् व्यख्यत् विख्याति । अन्तर्भूतणिजन्तो ज्ञेयः । श्रुत्या तथा व्याख्यातत्वात् । विख्यापयति इदं सर्वं विविधं प्रकाशयति । अन्यच्च योऽग्निः रोदसी द्यावापृथिव्योः अन्तर्मध्ये भानुना रश्मिना स्वयमाभाति समन्तात्प्रकाशते । यथा पर्जन्यो भानुना विद्युद्रूपेण द्यावापृथिव्योरन्तर्भाति एवमग्निः पर्जन्यवत् स्तूयते । ईम् निपातः पादपूरणे ॥ ६ ॥

अग्नेऽभ्यावर्तिन्नभि मा निवर्तस्वायुषा वर्चसा प्रजया धनेन सन्या मेधया रय्या पोषेण ॥७॥

[अग्ने । अभ्यावर्तिन्नित्यभि आवर्तिन् । अभि । मा । नि । वर्तस्व । आयुषा । वर्चसा । प्रजयेतिप्र जया । धनेन ॥ सन्या । मेधया । रय्या । पोषेण ॥७॥]

(आगे के चार मंत्रों द्वारा यजमान ऊपर उठाई अग्नि को अपने निकट लाता है)। हे हमारे सम्मुख आने वाले अग्ने ! आयुष्य, ब्रह्मवर्चस्, सन्तान, धन, अभीष्टलाभ, धारणावती बुद्धि, सुवर्णालंकारों तथा गो-अश्वादि की पुष्टि के साथ-साथ हमें सम्प्राप्त होओ ॥ ७ ॥

उ० अवहरति अग्ने अभ्यावर्तिन्निति । इतःप्रभृति पञ्चाग्नेय्यः । अग्ने अभ्यावर्तिन् ऊर्ध्वबृहती । हे अग्ने अभ्यावर्तनशील, अभिनिवर्तस्व मांप्रति । आयुषा । वर्चसा । अन्नेन । प्रजया । धनेन । सन्या लाभेन । मेधया । रय्या सुवर्णोत्कर्षेण । पोषेण धनपुष्ट्या ॥ ७ ॥

म० 'अवहरत्यग्नेऽभ्यावर्तिन्निति' (१६ । ५ । १५) । ऋक्चतुष्टयेन चतुर्वारमुख्याग्निमात्मसमीपमानयतीति सूत्रार्थः । अग्निदेवत्योर्ध्वबृहती द्वादशार्णत्रिपादा । अभि आभिमुख्येनावर्तितुं शीलमस्यास्तीत्यभ्यावर्ती तत्संबोधनम् अस्मदभिमुखागमनशील । आयुरादिभिः सह मा मामभि मांप्रति निवर्तस्व शीघ्रमागच्छ । आयुषा जीवनेन । वर्चसा ब्रह्मवर्चसेन । प्रजया पुत्रादिकया । धनेन वसुना । सन्या इष्टलाभेन । मेधया धारणावत्या बुद्ध्या । रय्या सुवर्णालंकारैः । पोषेण आयुरादीनां पुष्ट्या ॥ ७ ॥

अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः । अधा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥ ८ ॥